# শ্রীবিষ্ণুমহিম্নঃস্তোত্রম্

{॥ শ্রীবিষ্ণুমহিম্নঃস্তোত্রম্ ॥}

শ্রী গণেশায় নমঃ ।

মহিম্নস্তে পারং বিধিহরফণীন্দ্রপ্রভৃতয়ো

বিদুর্নাদ্যপ্যজ্ঞশ্চলমতিরহো নাথ নু কথম্ ।

বিজানীয়ামদ্ধা নলিননয়নাত্মীয়বচসো

বিশুদ্ধ্যৈ বক্ষ্যামীষদপি তু তথাপি স্বমতিতঃ ॥ ১॥

যদাহুর্ব্রহ্মৈকে পুরুষমিতরে কর্ম চ

পরেঽপরে বুদ্ধং চান্যে শিবমপি চ ধাতারমপরে ।

তথা শক্তিং কেচিদ্গণপতিমুতার্কং চ

সুধিয়ো মতীনাং বৈ ভেদাত্ত্বমসি তদশেষং মম মতিঃ ॥ ২॥

শিবঃ পাদাম্ভস্তে শিরসি ধৃতবানাদরযুতং

তথা শক্তিশ্চাসৌ তব তনুজতেজোময়তনুঃ ।

দিনেশং চৈবামুং তব নয়নমূচুস্তু নিয়মাস্ত্বদন্যঃ

কো ধ্যেয়ো জগতি কিল দেবো বদ বিভো ॥ ৩॥

ক্বচিন্মৎস্যঃ কূর্মঃ ক্বচিদপি বরাহো নরহরিঃ

ক্বচিৎখর্বো রামো দশরথসুতো নন্দতনয়ঃ ।

ক্বচিদ্বুদ্ধঃ কল্কির্বিহরসি কুভারাপহৃতয়ে

স্বতন্ত্রোঽজো নিত্যো বিভুরপি তবাক্রীডনমিদম্ ॥ ৪॥

হৃতাম্নায়েনোক্তং স্তবনবরমাকর্ণ্য বিধিনা
দ্রুতং মাৎস্যং ধৃত্বা বপুরজরশঙ্খাসুরমথো ।
ক্ষয়ং নীত্বা মৃত্যোর্নিগমগণমুদ্ধৃত্য জলধেরশেষং
সঙ্গুপ্তং জগদপি চ বেদৈকশরণম্ ॥ ৫॥

নিমজ্জন্তং বার্ধৌ নগবরমুপালোক্য
সহসা হিতার্থং দেবানাং কমঠবপুষাঽঽবিশ্য গহনম্ ।
পয়োরাশিং পৃষ্ঠে তমজিত সলীলং ঘৃতবতো
জগদ্ধাতুস্তেঽভূৎকিমু সুলভভারায় গিরিকঃ ॥ ৬॥

হিরণ্যাক্ষঃ ক্ষৌণীমবিশদসুরো নক্রনিলয়ং
সমাদায়ামর্ত্যৈঃ কমলজমুখৈরম্বরগতৈঃ ।
স্তুতেনানন্তাত্মন্নচিরমবভাতি স্ম
বিঘৃতা ত্বয়া দংষ্ট্রাগ্রেঽসাববনিরখিলা কন্দুক ইব ॥ ৭॥

হরিঃ ক্বাস্তীত্যুক্তে দনুজপতিনাঽঽপূর্য
নিখিলং জগন্নাদৈঃ স্তম্ভান্নরহরিশরীরেণ করজৈঃ ।
সমুৎপত্যাশূরাবসুরবরমাদারিতবতস্তবাখ্যাতা
ভূমন্কিমু জগতি নো সর্বগততা ॥ ৮॥

বিলোক্যাজং দ্বার্গং কপটলঘুকাযং সুররিপুর্নিষিদ্ধোঽপি
প্রাদাদসুরগুরুণাত্মীযমখিলম্ ।
প্রসন্নস্তদ্ভক্ত্যা ত্যজসি কিল নাদ্যাপি
ভবনং বলের্ভক্তাধীন্যং তব বিদিতমেবামরপতে ॥ ৯॥

সমাধাবাসক্তং নৃপতিতনযৈর্বীক্ষ্য পিতরং হতং
বাণৈ রোষাদ্গুরুতরমুপাদায পরশুম্ ।
বিনা ক্ষত্রং বিষ্ণো ক্ষিতিতলমশেষং কৃতবসোঽসকৃৎকিং
ভূভারোদ্ধরণপটুতা তে ন বিদিতা ॥ ১০॥

সমারাধ্যোমেশং ত্রিভুবনমিদং বাসবমুখং বশে
চক্রে চক্রিন্নগণযদনিশং জগদিদম্ ।
গতোঽসৌ লঙ্কেশস্ত্বচিরমথ তে বাণবিষযং
ন কেনাপ্তং ত্বত্তঃ ফলমবিনযস্যাসুররিপো ॥ ১১॥

ক্বচিদ্দিব্যং শৌর্যং ক্বচিদপি রণে কাপুরুষতা
ক্বচিদ্গীতাজ্ঞানং ক্বচিদপি পরস্ত্রীবিহরণম্ ।
ক্বচিন্মৃৎস্নাশিত্বং ক্বচিদপি চ বৈকুণ্ঠবিভবশ্চরিত্রং
তে নূনং শরণদ বিমোহায কুধিযাম্ ॥ ১২॥

ন হিংস্যাদিত্যেদ্ধ্রুবমবিতথং বাক্যমবুধৈরথাগ্নীষোমীযং
পশুমিতি তু বিপ্রৈর্নিগদিতম্ ।

তবৈতন্নাস্থানেঽসুরগণবিমোহায গদতঃ সমৃদ্ধির্নীচানাং

নযকর হি দুঃখায জগতঃ ॥ ১৩॥

বিভাগে বর্ণানাং নিগমনিচযে চাবনিতলে

বিলুপ্তে সঞ্জাতো দ্বিজবরগৃহে শম্ভলপুরে ।

সমারুহ্যাশ্বং স্বং লসদসিকরো

ম্লেচ্ছনিকরান্নিহন্তাঽস্যুন্মত্তান্কিল কলিযুগান্তে যুগপতে ॥ ১৪॥

গভীরে কাসারে জলচরবরাকৃষ্টচরণো রণেঽশক্তো

মজ্জন্নভযদ জলেঽচিন্তযদসৌ ।

যদা নাগেন্দ্রস্ত্বাং সপদি পদপাশাদপগতো গতঃ

স্বর্গং স্থানং ভবতি বিপদাং তে কিমু জনঃ ॥ ১৫॥

সুতৈঃ পৃষ্টো বেধাঃ প্রতিবচনদানেঽপ্রভুরসাবথাত্মন্যাত্মানং

শরণমগমত্ত্বাং ত্রিজগতাম্ ।

ততস্তেঽস্তাতঙ্কা যযুরথ মুদং হংসবপুষা

ত্বযা তে সার্বজ্ঞং প্রথিতমমরেশেহ কিমু নো ॥ ১৬॥

সমাবিদ্ধো মাতুর্বচনবিশিখৈরাশু বিপিনং তপশ্চক্রে

গত্বা তব পরমতোষায পরমম্ ।

ধ্রুবো লেভে দিব্যং পদমচলমল্পেঽপি বযসি

কিমস্ত্যস্মিঁল্লোকে ত্বযি বরদ তুষ্টে দুরধিগম্ ॥ ১৭॥

বৃকাদ্ভীতস্তূর্ণং স্বজনভযভিত্ত্বাং

পশুপতির্ভ্রমঁল্লোকাস্সর্বান্ শরণভুপযাতোঽথ দনুজঃ ।

স্বযং ভস্মীভূতস্তব বচনভঙ্গোদ্গতমতী

রমেশাহো মাযা তব দুরনুমেযাঽখিলজনৈঃ ।১৮॥

হৃতং দৈত্যৈর্দ্দিষ্ট্বাঽনৃতঘটমজৈয্যেস্তু নযতঃ কটাক্ষৈঃ

সংমোহং যুবতিবরবেষেণ দিতিজান্ ।

সমগ্রং পীযূষং সুভগ সুরপূগায দদতঃ সমস্যাপি

প্রাযস্তব খলু হি ভৃত্যেষ্বভিরতিঃ ॥ ১৯॥

সমাকৃষ্টা দুষ্টৈর্দ্রুপদতনযাঽলব্ধশরণা সভাযাং

সর্বাত্মংস্তব শরণমুচ্চৈরুপগতা ।

সমক্ষং সর্বেষামভবদচিরং চীরনিচযঃ স্মৃতেস্তে

সাফল্যং নযনবিষযং নো কিমু সতাম্ ॥ ২০॥

বদন্ত্যেকে স্থানং তব বরদ বৈকুণ্ঠমপরে

গবাং লোকং লোকং ফণিনিলযপাতালমিতরে ।

তথান্যে ক্ষীরোদং হৃদযনলিনং চাপি তু সতাং ন মন্যে

তৎস্থানং ত্বহমিহ চ যত্রাসি ন বিভো ॥ ২১॥

শিবোঽহং রুদ্রাণামহমমররাজো দিবিষদাং মুনীনাং

ব্যাসোঽহং সুরবর সমুদ্রোঽস্মি সরসাম্ ।

কুবেরো যক্ষাণামিতি তব বচো মন্দমতয়ে ন

জানে তজ্জাতং জগতি ননু যন্নাসি ভগবন্ ॥ ২২॥

শিরো নাকো নেত্রে শশিদিনকরাবম্বরমুরো দিশঃ

শ্রোত্রে বাণী নিগমনিকরস্তে কটিরিলা ।

অকূপারো বস্তিশ্চরণমপি পাতালমিতি

বৈ স্বরূপং তেঽজ্ঞাত্বা নৃতনুমবজানন্তি কুধিয়ঃ ॥ ২৩॥

শরীরং বৈকুণ্ঠং হৃদয়নলিনং বাসসদনং মনোবৃত্তিস্তার্ক্ষ্যো

মতিরিয়মথো সাগরসুতা ।

বিহারস্তেঽবস্থাত্রিতয়মসবঃ পার্ষদগণো ন পশ্যত্যজ্ঞা

ত্বামিহ বহিরহো যাতি জনতা ॥ ২৪॥

সুঘোরং কান্তারং বিশতি চ তডাগং সুগহনং

তথোত্তুঙ্গং শৃঙ্গং সপদি চ সমারোহতি গিরেঃ ।

প্রসূনার্থং চেতোম্বুজমমলমেকং ত্বয়ি বিভো

সমর্প্যাজ্ঞস্তূর্ণং বত ন চ সুখং বিন্দতি জনঃ ॥ ২৫॥

কৃতৈকান্তাবাসা বিগতনিখিলাশাঃ শমপরা

জিতশ্বাসোচ্ছ্বাসাস্ত্রুটিতভবপাশাঃ সুযমিনঃ ।

পরং জ্যোতিঃ পশ্যন্ত্যনঘ যদি পশ্যন্তু মম তু

শ্রিয়াশ্লিষ্টং ভূয়ান্নয়নবিষয়ং তে কিল বপুঃ ॥ ২৬॥

কদা গঙ্গোত্তুঙ্গামলতরতরঙ্গাচ্ছপুলিনে

বসন্নাশাপাশাদখিলখলদাশাদ্ অপগতঃ ।

অয়ে লক্ষ্মীকান্তাম্বুজনয়ন তাতামরপতে

প্রসীদেত্যাজল্পন্নমরবর নেষ্যামি সময়ম্ ॥ ২৭॥

কদা শৃঙ্গৈঃ স্ফীতে মুনিগণপরীতে হিমনগে দ্রুমাবীতে

শীতে সুরমধুরগীতে প্রতিবসন্ ।

ক্বচিদ্ধ্যানাসক্তো বিষয়সুবিরক্তো ভবহরং

স্মরঁস্তে পাদাব্জং জনিহর সমেষ্যামি বিলয়ম্ ॥ ২৮॥

সুধাপানং জ্ঞানং ন চ বিপুলদানং ন নিগমো

ন যাগো নো যোগো ন চ নিখিলভোগোপরমণম্ ।

জপো নো নো তীর্থং ব্রতমিহ ন চোগ্রং ত্বয়ি

তপো বিনা ভক্তিং তেঽলং ভবভয়বিনাশায় মধুহন্ ॥ ২৯॥

নমঃ সর্বেষ্টায় শ্রুতিশিখরদৃষ্টায় চ নমো

নমোঽসংশ্লিষ্টায় ত্রিভুবননিবিষ্টায় চ নমঃ ।

নমোবিস্পষ্টায় প্রণবপরিমৃষ্টায় চ নমো

নমস্তে সর্বাত্মন্পুনরপি পুনস্তে মম নমঃ ॥ ৩০॥

কণান্কশ্চিদ্বৃষ্টের্গণননিপুণস্তূর্ণমবনেস্তথা-

শেষান্পাংসূনমিত কলয়েচ্চাপি তু জনঃ ।

নভঃ পিণ্ডীকুর্যাদশিরমপি চেচ্চর্মবদিদং
তথাপীশাসৌ তে কলযিতুমলং নাখিলগুণান্ ॥ ৩১ ॥

ক্ক মাহাত্ম্যং সীমোজ্ঝিতমবিষযং বেদবচসাং বিভো
তে মে চেতঃ ক্ক চ বিবিধতাপাহতমিদম্ ।
মযেদং যৎকিঞ্চিদ্গদিতমথ বাল্যেন তু গুরো
গৃহাণৈতচ্ছুদ্ধার্পিতমিহ ন হেযং হি মহতাম্ ॥ ৩২ ॥

ইতি হরিস্তবনং সুমনোহরং পরমহংসজনেন সমীরিতম্ ।
সুগমসুন্দরসারপদাস্পদং তদিদমস্তু হরেরনিশং মুদে ॥ ৩৩॥

গদারথাঙ্গাম্বুজকম্বুধারিণো রমাসমাশ্লিষ্টতনোস্তনোতু নঃ ।
বিলেশযাধীশশরীরশাযিনঃ শিবং স্তবোঽস্ত্রমযং পরং হরেঃ ॥ ৩৪ ॥

পঠেদিমং যস্তু নরঃ পরং স্তবং সমাহিতোঘৌঘঘনপ্রভঞ্জনম্ ।
স বিন্দতেঽত্রাখিলভোগসম্পদো মহীযতে বিষ্ণুপদে ততো ধ্রুবম্ ॥ ৩৫॥

। ইতি শ্রীমৎপরমহংসস্বামিব্রহ্মানন্দবিরচিতং
শ্রীবিষ্ণুমহিম্নঃ স্তোত্রং সম্পূর্ণম্ ।

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Vishnu Mahimna Stotram Lyrics in Bengali PDF
% File name : vishhnumahimna.itx
% Location : doc_vishhnu
% Author : brahmAnanda
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : WebD
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Latest update : December 30, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website